त्यजेत् ५ प्रातःशुक्लांबरधरःकृतपंचमहाध्वरः सपर्यामाचरेद्विष्णोःस्थिरचित्तोहि
वैष्णवः ६ इषदुष्णजलैःशुद्धैःस्नापयेद्विष्णुमव्ययं अतिस्फलधैश्चंदनैश्चविष्णो
रंगानिलेपयेत् ७ पूजायैजगदीशस्यदेवदेवस्यचक्रिणः प्रक्षालितानिपात्राणि
जलहीनानिकारयेत् ८ स्नापयित्वाजगन्नाथमिषदुष्णजलैस्ततः प्रोक्षितव्यं
शरीरेहिदिव्यवस्त्रेणयत्नतः ९ सलिलैरिषदुष्णैश्चयःस्नापयतिकेशवं माघेमा
सिद्विजश्रेष्ठफलंतस्यमयोच्यते १० विमुक्तःपातकैःसर्वैजन्मजन्मांतरार्जितैः इ

हभुक्त्वासुखंसर्वंशेषेयातिहरेर्गृहं ११ पत्रात्मसाल्पपात्राणिकृत्वाहीनानिवारिभिः
यःपूजयेज्जगन्नाथंतस्यपुण्यंनिशामय १२ इहभुक्त्वाखिलान्भोगान्सर्वव्याधि
विवर्जितः अंतेयुगसहस्राणितिष्ठेत्केशवसन्निधौ १३ प्रभातेपिचसंध्यायांपुर
तश्चक्रपाणिनः ज्वलंतंस्थापयेद्वन्हिंनिर्धूमंवैष्णवोजनः १४ शीतस्यवारणार्थाय
प्रातःसायंचयोजनः माघेविष्णवयतोवन्हिज्वालयेत्तस्फलंशृणु १५ इहभुक्त्वाखि
लान्भोगान्पुत्रपौत्रसमन्वितान् अंतेविष्णुरयंयांतिदेवनैरपिदुर्लभं १६ यथै

वात्मानयाविष्णुःसंदेहोनात्रविद्यते तस्मादात्मानुमानेनविष्णुपूजाविधीयते १७

१०१

प्रभातेरौद्रदेशेत्वपवित्रेस्थापयेद्धरिं नभुनक्तिद्विजश्रेष्ठयावच्छीतंसुदुःसहं १८ स्वयंतं
देवदेवेशंमंचकोपरिकेशवं स्थापयेन्निशिनिर्वातदेशेचवैष्णवोजनः १९ नश्चामो
तियथाशीतंदेवदेवोजगद्गुरु श्लक्ष्णैःपवित्रैर्वस्त्रैस्तंदिव्यैराच्छादयेद्बुधः २० आत्मानः
कुरुतेमर्त्योयथाशीतनिवारणं तथाशीतक्षयंकुर्याद्विदेवस्यचक्रिणः २१ क्षीरे
णास्थापयेद्यस्तुमाघेमासिजनार्दनं तस्मैदेवोत्तमोविष्णुःसंतुष्टोनंददातिविः
२२ यःपूजयेज्जगन्नाथंस्थापयित्वाजनार्दनं नारिकेलोदकैर्दग्धैःफलंतस्यव
दाम्यहं २३ नरकाब्धौमज्जमानान्दुस्तरेस्वेनकर्मणा उधृत्यकोटिपुरुषान्मोदि

रंयान्निवर्त्तिणः २४ माघेमासीत्त्वशुक्लायांपंचम्यांद्विजसत्तम एकादश्यांचसप्तम्यांहरिः

पूज्योविशेषतः २५ दानंयोदेवदेवायसपद्मायसुरारये पायसंसूपसहितंमाघेमासि

दिनेदिने २६ साज्यंपायसंयस्तुमाघेयच्छतिचक्रिणे तस्यपुण्यंमहंवक्ष्येशृणुत्वं

द्भवजैमिने २७ अंतेविष्णुपुरंगत्वामन्वंतरचतुष्टयं भुक्त्वामनोरमान्भोगान्प्रसा

दाच्चक्रपाणिनः २८ पुनरायपृथिवीचक्रवर्तीनृपोभवेत् भुक्त्वाभोगंवसुचिरंत

तोयातिहरेर्गृहं २९ पंचम्यांचैवसप्तम्यामेकादश्यांचजैमिने स्नात्वाचैष्णवद्वा

दरमान्नंमुरारये ३० कृष्णपक्षेद्विजश्रेष्ठशुक्लपक्षेविशेषतः शुक्लपक्षेतिथिष्वेमद

१०२

त्वान्नंद्विजायते ३१ एकाहमपियोमाघेवैष्णवोदैत्यजिष्णवे साज्यंपायसंदद्यान्नतस्य

दुर्लभोहरिः ३२ यत्किंचिद्विष्णवेद्रव्यंमाघेमासिप्रदीयते तदक्षयंभवेत्सर्वंकोपिना

स्त्यत्रसंशयः ३३ माघेमासिकृतंकर्मशुभंवायदिवाशुभं तस्यनास्तिक्षयंविप्रम

न्वंतरशतैरपि ३४ माघेचंपकपुष्पेणयोर्चयेत्कमलापतिः सगच्छेत्परमंधामवि

मुक्तःसर्वपातकैः ३५ यावंतिस्वर्णपुष्पाणिदीयतेचक्रपाणये तावद्युगसहस्रा

णिस्थीयतेविष्णुमंदिरे ३६ मेरुतुल्यसहस्राणिदत्वाभवतियत्फलं एकेनस्व

र्णपुष्पेणहरिंसंपूज्यतत्फलं ३७ सुवर्णपुष्पविप्रेंद्रसर्वदाकेशवप्रियं माघेमासि

विशेषेणपवित्रेकेशवप्रियः ३९ सुवर्णकुसुमैर्दिव्यैर्येननाराधितोहरिः रत्नहीनःसुवर्णाढ्यःस
भवेज्जन्मजन्मनि ४० फलंचरएकपुष्पस्यब्रवीम्यहविशेषतः आकर्णयद्विजश्रेष्ठसेतिहास
मनुत्तमं ४० सुवर्णानामभूपालोबलवान्सर्वशास्त्रवित् आर्यावर्तेषुदेशेषुबभूवप्रव
रोजसा ४१ राजश्रियाविद्ययाचवयसाचसभूपतिः अतिप्रमत्तोविपर्षेसदापापरतो
भवेत् ४२ पाखंडमंत्रिणांवाक्यैर्विनाशोपैरपिद्विज धनंलोभातेनराज्ञादंडेनसाध
वोजनाः ४३ अन्यायोपार्जितंवित्तंगीतवाद्यादिभिर्व्ययः समस्तंनाशयामासयज्ञ
दानविवर्जितः ४४ नज्ञातिपाषणंचक्रेनदेवद्विजपूजनं नचयाचकसंतुष्टिंस

१०७

राजापापमोहितः ४५ नचकाराःतिथेःपूजांजहारगुरुयोषितं पपौचमंदिरांनित्यंस
भूपःपापमंदिरः ४६ कृतानितानिपापानियानियान्याविवेकिना अपिवर्षशतैः
शक्तःसंख्यातुंतानितानिकः ४७ एकदासमहीपालःकामेनपरिमोहितः ज
गामवेश्यानिलयंनिशीथेदुरिताकरं तमायांतंततोदृष्ट्वाभूपालमुज्वलाहृया सह
सोत्थायपर्यंकाच्चक्रेतत्पादवंदनं ४९ प्रक्षाल्यतत्पादयुगंसुंगारस्थसलिलस्वसः
मर्चैनिवेशयामासाशोभ्यमालिंग्यतंनृपं ५० तत्प्रेमामृतधाराभिःसिक्तोसौपृथिवी
पतिः तास्मिन्नमणपर्यंकेतयासहकुतूहली ५१ ततःसागापिकाप्रीत्याहसंतीन

वयोवना ददौचंपकपुष्पाणांतस्मैभूमिभुजेस्रजं ५२ पुष्पमाल्यात्पुष्पमेकंतस्मात्पतितं
हस्तगात् पापानधरणीपृष्ठेगंधव्याप्तदिगंतरं ५३ तच्चुतकुसुमंदृष्ट्वासराजात्यंत
संभ्रमात् नमोनारायणेतिजगादोंकारपूर्वकं ५४ नारायणेतिवाक्येनसर्वाणिपात
कानिच विष्णोस्तत्पुष्पदानेनतस्यनष्टानिभूभुजः ५५ यामीणाम्प्याप्यसर्वोपिस
मागत्यातिदुर्नयं तस्यामेवनिशायांयाजग्मुर्वैवस्वतागृहंस्थितं ५६ नेतुंतमथभूपा
लंसर्वपातकिनांवरं किंकरान्प्रेषयामासक्रुद्धोवैवस्वतस्तदा ५७ तेनाज्ञ
प्तास्ततोदूताःपाशमुद्गरपाणयः अतिवेगात्समायाताःक्रोधसंरक्तलोचनाः ५८

तंबध्वाचर्मपाशेनज्वलज्ज्वलनलोचनं उद्यम्यचक्रिरेगंतुंयमंदूतायमालयं ५९ ततो
नारायणप्रेष्याःशंखचक्रगदाधराः आयाताःगरुडारूढास्तंनेतुंपृथिवीपतिं ६० पा
शे ब्धनयंत्रितंदृष्ट्वातंनृपंविष्णुकिंकराः जघ्नुश्चक्रैर्गदाभिश्चयमदूतान्रुषापथि
६१ तेत्यत्कास्यंतसंत्रासाद्यमदूताःप्रदुद्रुवुः विष्णुदूतगदाचक्रप्रहारास्ततजर्जराः ६२
अथतंपृथिवीपालंविष्णुदूतामहाबलाः समारोप्यरथेदिव्येत्रांरवनादप्रुरुत्तमान्
६३ अथराजारथारूढस्तुलसीमाल्यभूषितः पीतकौशेयवासाश्चनानालंकारभू
षिता स्तूयमानोमुनिगणैर्वेदवेदांगपारगैः विष्णुदूतैःपरिवृतोविष्णुसालोक्यमा

पयौ ६५ अथउत्थायविष्णुश्चतुर्भिर्दीर्घबाहुभिः तमालिंगितवान्भूपंप्रोक्तवांश्चद्विजोत्त
मं ६६ श्रीभगवानुवाच नृपतेःकुशलंब्रूहिसर्वपुण्यात्मनांवर किमस्त्वसाध्यंभवत
स्त्वमाज्ञापयसांप्रतं ६७ नमोनारायणायेतिवारैकमपियोवदेत् नित्यंतस्यानुपालो
हंसमेभ्रातासमेपिता ६८ नारायणेतियन्नामकदाचिद्यःस्मरेज्जनः साधयाम्यखि
लं ~ तस्यापितुःपुत्रइवोत्तमः ६९ मद्भक्तोसिनिजश्रेष्ठतस्मान्निजमनोरथं प्रकाश
यद्रुतंभ्रातःकिंप्रदास्यामितेधुना ७० राजोवाच सर्वमेवदयासिंधोत्वत्प्रसादात्तंनसं
शयः पापिनापिमयाप्राप्तंतवस्थानंसुदुर्लभं ७१ व्यासउवाच तस्यातेनचवाक्ये

नप्रसन्नःकमलापतिः स्नेहान्निवेशयामासभूपालंतंनिजासने ७२ ततःसुवर्णालंकारे
र्विश्वकर्मविनिर्मितैः चकारमंडनंतस्यस्वयमेवदयामयः ७३ अथनानाविधैर्भक्ष्यैर्दे
वैरपिसुदुर्लभैः तोषितःसमहीपालोविष्णुनाभ्रात्नुजिष्णुना ७४ एवंप्रतिदिनंतस्यौ
सराजाविष्णुमंदिरे मन्वंतरसहस्राणिलक्षवर्षशतानिच ७५ प्रजानांपालनंचक्रे
सराजाधर्मतत्परः पूजयामाससततंभक्त्यापरमयाहरिं ७६ चारुचंपकपुष्पैश्च
नैवेद्यैर्विविधैस्त्रसः आयुःशेषेभूमिपालोमरणंजाह्नवीजले ७७ समासाद्ययया
मोक्षंप्रसादाच्चक्रपाणिनः व्यासउवाच विप्रचंपकपुष्पस्यप्रभावोयंप्रकीर्तितः ७८

चंपकैर्हरिमभ्यर्च्यमुक्तास्युःपापिनोपिच स्फुरच्चंपकपुष्पेणपूजितोभगवान्हरिः ७९ अ
चिरेणैवकालेनददातिपरमंपदं येयजंतिपरात्मानंमीमेछयावाप्यनिछया ८० तेप्रयां
तिपरंधामविमुक्ताःसर्वपातकैः हरेःप्रसन्नैसुकृतीनकोपिरुष्टेचनास्मिन्सुकृतीनकोपी
यतःसराजाकृतपातकोपिजगामभोक्षंकृपयामुरारेः ८१ विश्वार्णवंनिम्नामिमंति
तीर्षुर्दिव्यैःसुगंधैःकनकप्रसूनैः नारायणंपद्मदलायतेक्षणंमर्त्योयियोविप्रविहाय
पापं ८२ इतिश्रीपद्मपुराणेक्रियायोगसारेनवमोध्यायः ९ छ व्यासउवाच

जैमिनेविधिनानेनपूजितव्योहरिःप्रभुः नमहंवच्मिविप्रर्षेश्रृणुतत्सुसमाहितः १

कल्यमुत्थायपर्यंकाद्गृहीत्वापात्रमंभसां बहिर्देशंव्रजेत्प्राज्ञःशीर्षमाछाद्यवाससा २
ततोदीचीमुखोमौनीयज्ञसूत्राणिकर्णयोः कृतोपविष्टःप्राज्ञस्तुमलमुत्रंविसर्जयेत् ३
देवतायतनेमार्गेगोष्ठेचचत्वरेपुन रथ्यायांकृष्टभूमौचदर्भस्थल्यांतथागणे ४ नदि
नीपुलिनंचैववृक्षमूलेतथावने तडागवापीगर्तेषुमलमुत्रंनसर्जयेत् ५ रविंचंद्र
मसंचैववह्निंजानाग्नादित्रोदत्रा मलमूत्रंत्यजेद्यावत्तवाःप्राज्ञोनपश्यति ६ खनि
तांमूषकाद्यैर्वल्मजलाभ्यंतरवर्तिनो हृतांकृष्टांमृदंन्नैववृक्षमूलेतथावनेगृण्हीया
च्छौचहेतवे ७ जलाञ्जलंसमानीयशौचकुर्याद्विचक्षणः पायुजलेषुवैदद्यात्ज्ञो

चंकुर्यात्तेबुधः ८ दक्षिणाभिमुखोरात्रौकृत्वाप्राज्ञोबहिःक्रियाः शिरःप्रावृत्यवस्त्रेणततः
शौचंसमाचरेत् ९ मृत्तिकैकाप्रदातव्यालिंगेलिस्त्रस्तथागुदे सप्तसव्येकरेप्राज्ञोहस्त
योरुभयोस्त्रय १० पादयोश्चप्रदातव्यास्तिस्त्रस्तिस्त्रश्चमृत्तिका कृतशौचस्ततःप्राज्ञः
कुर्याद्दंतस्यधावनं ११ जिव्हायामार्जनंचापिरसनाछादनादिभि दक्षिणाभिमुखो
भूत्वापश्चिमाभिमुखस्तथा १२ नदंतधावनंकुर्यात्कुर्यात्त्रेनारकीभवेत् मध्यमाना
मिकाभ्यांचवृद्धांगुष्ठेनचद्विज १३ नदंतधावनंकुर्यात्तर्जन्यानकदाचन अश्वत्थवट

१०७

बिल्वानांधात्र्याःकाष्टिकयाबुधः १४ नदंतधावनंकुर्यात्तयेंद्रस्तुरस्यच नित्यक्रियाप्र

लोभेक्रूस्त्वरयादंतधावनं १५ प्रभातसमयेप्राज्ञःसूर्योदयविवर्जितं सूर्योदयेद्विजश्रे
ष्ठयःकुर्याद्दंतधावनं १६ क्रियाद्विजेंद्रतस्यापिसर्वाएवविनश्यति यःस्नानसमयेकु
र्याज्जैमिनेदंतधावनं १७ निराशाःपितरोयांतितस्यदेवासुरर्षयः दंतस्यधावनं
कुर्याद्योमध्यान्हापरान्हयोः १८ तस्यपुष्पंनगृण्हांतिदेवताःपितरोजलं स्नान
कापुष्करण्यांयःकुर्याद्दंतधावनं १९ नवदेवसचांडालोतावद्गंगानपश्यति भग
वत्सुदिनेसूर्येयःकुर्याद्दंतधावनं २० तद्दंतकाष्टंपितरोभुत्क्वागच्छंतिदुःखिनः
उपवासादिनेविप्रपितृश्राद्धदिनेतथा २१ नतत्फलमवाप्नोतिदंतधावनकृन्नरः

प्रभातेमार्जयेद्दंतानयादर्शेनवाससि २२ कुर्याद्द्वादशविप्रेंद्रफललानिजलैर्बुधः उपवासे
पितृश्राद्धेविधिनानेनजैमिने २३ दंतधावनकृन्मर्त्यसंपूर्णलभतेफलं अनेनविधिना
कृत्वाप्राज्ञोविप्रबहिःक्रियां २४ ततोनिजगृहंगत्वारात्रिवासःपरित्यजेत् ततोदेवगृहद्वा
रमुपविष्टोबुधःशुचिः २५ स्मरेन्नारायणंदेवमनंतंपुरुषोत्तमं रामश्यामततोविष्णुना
रायणकृपामय २६ जनार्दनजगद्धामपापंमेहरकेशव पीतांबरधरानंतपद्मनाभजगन्म
य २७ वामनप्रणतक्लेशविदारणजगद्गुरो दामोदरयदुश्रेष्ठश्रीकृष्णकरुणार्णव
२८ कमलक्षणदैवंदवासुदेवकृपांकुरु गरुडध्वजगोविंदविश्वंभरगदाधरः २९

राम
१०८

शंखपाणेचक्रपाणेपद्महस्तहरापदं लक्ष्मीविलासवैकुंठहृषीकेशासुरोत्तमः ३० पुरुषोत्त
मकंसारेकैटभारेभयंहरः श्रीपतेश्रीधरःश्रीशःश्रीदःश्रीकरमाधव ३१ परंब्रह्मपरं
धामशरणंमेभवाच्युत इत्थंकृत्वाद्विजश्रेष्ठाश्रीविष्णुःस्मरणंबुधः ३२ बद्धांजलि
कृतोब्रूतेप्रविश्यनिलयंततः इश्वरःश्रीपतेकृष्णदेवकीनंदनःप्रभो ३३ निद्रांत्यज
जगन्नाथात्रप्रभातसमयोभवेत् सुप्तोत्थितमिवप्राज्ञःपर्यंकाद्देवकीसुतं ३४ ग
तनिद्रंसुलक्ष्माकंचिंतयेद्द्विजचेतसा ततश्चनछदंदिव्यंपात्रंचजलपूरितं ३५ मुखं
प्रक्षालनार्घ्यर्थदद्यात्कृष्णायवैसव इश्वरंवर्त्तनार्थायसेवंसेवकायथा ३६ तथैव

मत्तमत्तोपिसेवंतेपरमेश्वरं अचिरेणैवविप्रर्षेनस्पसिध्यंतिवांछितं ३७ तयेश्वरस्पसमयंसेवां
कुर्वंतिचेटकाः प्राज्ञास्तथैवसेवंतेसर्वदेवप्रभुंहरि ३८ निजेछयायदाविष्णुर्निर्भियःपूज
येज्जनः नवसेवकसंबंधस्तदानहिभवेद्विज ३९ अतएवद्विजश्रेष्ठस्तरमाकमलापते
कर्त्तव्यासर्वदासेवापुंसां कैवल्यसिद्धता ४० निर्माल्यंरात्रिवासंचगंधपर्युषितंतथा
हरेरुत्तारयेद्दंगात्मभानेवैष्णवोजनः ४१ ततोदेवालयेविष्णोस्स्वयमेवहिमार्जनं कुर्या
च्छनैःशनैप्राज्ञःसमार्जन्यापरिवेत्रया ४२ यावंतोरेणवोध्वस्तागछंतिनिलयाद्बहिः
तवन्मन्वंतरवानंतिष्टेद्विष्णुगृहेपुनः ४३ यस्तुसंमार्जनेकुर्याद्भक्त्यामहापिहरेर्गृहे सो

१०९

पियानिहरेर्द्धामकिमन्यैर्बहुभाषितैः ४४ अथोपलेपनंकुर्याद्गोमयैर्वर्णकैर्जलैः त
स्मिन्विष्णुगृहेप्राज्ञःस्मरन्नारायणंप्रभुं ४५ यस्तुसंलेपनंकुर्याद्विष्णकेशवमंदिरे त
स्यपुण्यफलंवच्मिसंक्षेपाच्छृणुजैमिने ४६ रजांसितत्रयावंतिविनश्यंतिद्विजोत्तम
तावत्तकल्पसहस्राणितिष्टेद्विष्णुगृहेसुखी ४७ सम्मार्ज्जनंविष्णुगृहेयःकुर्यादुपलेप
नं लभतेपरमंधामकः पूजाफलविस्मयोः ४८ दैवाद्राजविरोधेननशक्नोतियदास्व
य तदाविष्णुगृहेप्रातर्धर्मपत्नींनियोजयेत् ४९ अथवातनयंमकंसुचरित्रंद्विजोत्त
म भ्रातरंभगिनींवापिपवित्रांवैनियोजयेत् ५० हरेःसपर्यावस्त्राणिसम्यधास्शुद्धवा

रिभिः प्रक्षालयेद्दिधांवापिस्वयमेवापियत्नतः ५१ आम्लेनताम्रपात्राणिकांस्यपात्राणिभ
स्मना वन्हिनालोहपात्राणिशुध्यंतिनात्रसंशयः ५२ धनाधोलोहपात्रेस्थैर्यःस्ना
पयनिकेशवं नारायणंजगन्नाथंतस्यतुष्टोनकेशवः लोहपात्रेणपानीयंनपिबेद्दे
क्षवोजनः अज्ञानाद्यापिबेत्तर्हिवांगास्नानेनशुध्यति ५४ संप्राप्तिब्राह्मणंश्रेष्ठक
र्तव्यंनियमःसदा विपत्त्यांनियमोनास्तिशास्त्रेष्वपिनिविनिश्चयं ५५ यत्नात्प्रक्षालि
तोशंखोयदाभूमिस्पृशेत्पुनः तदासशंखोविप्रेंद्रस्नातधौतेनशुध्यति ५६ इत्थंप्र
क्षाल्ययत्नेनपूजाद्रव्याणिचक्रिणः गृहीत्वास्नानवस्तूनिस्नानार्थंसरसीव्रजेत् ५७

अकृत्वास्नानकर्माणिगृहमायातियःपुनः तस्मिन्दिनेपितृगणास्तस्यनाप्नोतितर्पणं
५८ स्नानार्थंभोजनार्थंवागच्छतोविघ्नरूद्भवेत् यश्चमोहाद्दिजश्रेष्ठसनूनंनारकी
भवेत् ५९ स्नानार्थंसरसींगत्वामलमूत्रंकरोतियः पितरस्तस्यविण्मूत्रंभोजिनः
स्युर्नसंशयः ६० ततःकृत्वाविधानेनस्नानंचतर्पणादिकं स्वकीयंगृहमागच्छेत्
स्मरन्नारायणंप्रभुं ६१ ततश्चप्रांगणेप्राज्ञःप्रक्षाल्यचरणद्वयं प्रविशेद्देवता
गारंशुचिर्ब्राह्मणसत्तमः ६२ सप्रक्षालितपादोयःप्रविशेन्निलयंप्रति संवत्सर
कृतंपुण्यंतस्यनश्यतितत्क्षणात् ६३ स्नानंकृत्वासमागत्यप्रांगणेषुचसत्तमः

तस्मात्प्रक्षाल्यचरणौ प्रविशेद्देवतागृहं ६४ उपविष्टः पादयुग्मं बुधः सव्येन पाणिना यत्नात्प्रक्षालयेद्विप्र पश्चात्पाणिद्वयं तथा ६५ पादं तथा दक्षिणं तथा दक्षिणपाणिना पश्चात्प्रक्षालयेद्विप्र सं लक्ष्मीत्यजनं अद्भुतं ६६ अथोपरिष्टात् मनिमान् कृत्वा चैनमारभेत् अनन्यमनसो भूत्वा सर्वकामफलप्रदं ६७ मृगचर्मासने कुर्यात् व्याघ्रचर्मासने तथा वस्त्रासने कंबले च तथा कुशासने ६८ पुष्पासने चोपविष्ट पूजयेत् कमलापतिं काष्ठासने द्विजश्रेष्ठ न कुर्याद्विष्णुपूजनं ६९ विष्णुनात्व धता पृथ्वी सर्वलोकास्त्वया धृता अतः सर्वसहे देवि वसुमे स्थानमुत्तमं ७० १११

इत्युक्त्वा तं समास्तीर्य कुर्विशेन्नारायणार्चकः दक्षिणाभिमुखो भूत्वा न कुर्यात्पूजनं हरेः ७१ शंखे कृत्वा तु पानीयं गंधयुतं सुवासितं पूजयेत्कमलानाथ कमलासहितं प्रभु ७२ शंखेन स्नापयद्यस्तु भगवंतं जनार्दनं फलं तस्य प्रवक्ष्यामि शृणु विप्रेंद्र जैमिने ७३ विप्रगोस्त्रीसुरापान भ्रूणहत्यादिपातकैः विमुक्तो याति वैकुंठं मुक्तो हसकलं सुरेः ७४ यद्यदिष्टं हृषीकेशं प्रपूजयेन्मानवो द्विज लभते तत्तद्देवाशु प्रसादात्कमलापतेः ७५ शंखभावे द्विजश्रेष्ठ सुगंधे मुदकं बुधः कृत्वा च तुलसीपत्रे स्नापयेत्परमेश्वरं ७६ ततो देवं स्नापयित्वा

संस्थाप्यववरासने सुगंधैश्चंदनैस्तस्यकुर्यात्सर्वांगलेपनं ७७ यःकरोतिजन्मत
स्यप्रसन्नःसततंहरिः तुलसीपत्रमालेयंनिजगंधसुखप्रदा ७८ दीयतेचजगन्ना
थसुप्रीतोभवसर्वदा मंत्रेणानेनदेवेंद्रंतुलसीपत्रमालया ७९ अलंकृतोमहावि
ष्णुप्रसन्नोनददातिकिं ततस्तुवैदिकैर्मंत्रैःकर्तव्यंस्वस्तिवाचनं ८० दिग्बंधनं
चकर्तव्यंमंत्रैःपौराणिकैर्बुधः कृष्णोरक्षतुपूर्वस्यामाग्नेयांदेवकीसुतः ८१ या
म्यांरक्षतुदैत्यारिर्नैरृत्यांमधुसूदनः वारुण्यांकेशवोदेवोवायव्यांगरुडध्वजः ८२
उत्तरेरक्षतुकौबेर्य्यामैशान्यांधृतमंदरः त्रिविक्रमस्तुरक्षतुश्रीमानूर्ध्वेन्रपविभुः

११२

८३ अधोरक्षतुविश्वात्माकूर्ममूर्तिःकृपामयः येचविघ्नकराःसंतैवेपूजाकालेभवं
तिते ८४ दूरंगच्छंतुतत्सर्वेहरिणामंत्रताडिताः इत्थंदिग्बंधनंकृत्वाततःप्राज्ञःकृ
तांजलिः ८५ वक्ष्यमाणेनमंत्रेणसंकल्पंकुरुतेहठं मयाकृतामिमांपूजांदेवदेवजना
र्दन ८६ सिद्धिंप्रापयनिर्विघ्नांप्रसीदपरमेश्वर ततस्तुकृतसंकल्पोवैष्णवःपरमात्म
वित् ८७ अंगन्यासादिकंकृत्वास्मरेन्नारायणंहृदा नवीनमेघसंकाशंपुंडरीकनिभे
क्षणं ८८ पीतांबरधरंदेवंस्मितचारुतरानन कदंबपुष्पमालाभिर्भूषितंसुमहाभु
जं ८९ बर्हाग्रनिबद्धशिरसंशिखंडधृतकुंडलं वंशीमधुरनादेननादयंतंदिशोदश ९०

आवृतंगोपनारीभिश्चारुवृंदावनेस्थितं एवंविचिंत्यदेवेशंश्रीकृष्णंदेवकीसुतं ९१ ततस्त्वदे
हनंकुर्यात्भक्तिभावसमन्वितं आवाहितायकृष्णायचतुर्वर्गप्रदायिने ९२ पाद्यार्घ्याचम
नीयादिक्रमाद्दद्याद्विचक्षणः कोमलैस्तुलसीपत्रैर्वन्यैर्वाकुसुमैर्बुधः ९३ पूजयेद्देवदेवे
शंगोविंदंसर्वकामदं नमोमत्स्यायकूर्मायवाराहायनमोनमः ९४ नमोनृहरयेतुभ्यं
वामनायनमोनमः नमोरामायव्यासायरामायहलिनेनमः ९५ नमोबुद्धायसकृ
पाय सकृपायनमोनमः नमस्तेकल्किनेतुभ्यंनमस्तेबहुमूर्तये ९६ नारायणा
यकृष्णायगोविंदायचशार्ङ्गिणे दामोदरायदेवायदेवदेवायतेनमः ९७ हृषीकेशाय

शांतायव्योमकेशायतेनमः नमोस्तुपद्मनाभायनमस्तेपद्मचक्षुषे ९८ नमस्तेपद्महस्ताय
पद्मपादायतेनमः अनंतायनमस्तुभ्यमच्युतायनमोनमः ९९ तार्क्ष्यध्वजायवैतुभ्यंन
मस्तेचक्रपाणये नमोस्तुपद्मपतयेसहस्रायवैनमः १०० नमोदैत्यारयेतुभ्यंस
र्वकामप्रदायिने माधवायप्रदेवायविश्वायपरमात्मने १०१ किरीटिनेकुंडलिनेनमो
स्तुहरयेसदा नमोभगवतेतुभ्यंनमोस्तुवनमालिने २ हरेर्दक्षिणपार्श्वेतुपूजयें
त्कमलालयां वामपार्श्वेतुविप्रेंद्रशुक्लवर्णासरस्वतीं ३ संमुखेपूजयेद्विष्णोर्वाहनं
गरुडाह्वयं ॐनमोगरुडायेतिमंत्रेणैवविचक्षणः ४ शंखायचक्रायतथागदा

यैवनमोनमः इतिसंपूज्यदेवेशंसदारंचसवाहनं ५ सायुधंचततोमंत्रंजपेद्दशाक्षरंबुधः निजशक्त्यानतोजप्त्वामंत्रमष्टाक्षरंसुधीः ६ गोविंदायततोदद्यान्नानानैवेद्यमुत्तमं धूपंदीपंचतांबूलंदेवदेवायजिष्णवे ७ अन्यान्यप्युपहाराणिप्रदद्याद्वैष्णवोजनाः यस्तुधूपंद्विजश्रेष्ठचंदनागरुवासितं ८ दद्यान्मुरारयेतस्यपुण्यंनासिधर्मातवांछितं धूपंयच्छतियोविप्रहरयेघृतवासितं ९ सगच्छेद्विष्णुसदनंविमुक्तःपापकोटिभिः नारायणाययोधूपंदद्याद्गुग्गुलवासितं १० सयातिपरमंधामदुर्लभंयत्सुरैरपि घृतेनदीपंयोदद्यात्तिलतैलेनवापुनः ११ निमिषात्सकलं

तस्यपापंहरतिकेशवः कर्पूरंसहितंयस्तुतांबूलंचक्रपाणये १२ दद्यात्तस्यद्विजश्रेष्ठेमुक्तिर्भवतिजैमिने यस्तुयच्छतितांबूलंखदिरेणसमन्वितं १३ इहभुक्त्वाखिलान्भोगानंतेयातिहरेर्गृहं यश्चामधुरिकायुक्तंतथाजातीफलादिभिः १४ तांबूलंहरयेदद्यात्स्वर्गमाप्नोतिमानवः ततश्चकृत्वानुपानीयंकुर्याद्विष्णुप्रदक्षिणं १५ वक्ष्यमाणेनमंत्रेणवैष्णवोजैमिनेजनः जनार्दनजगद्धामञ्शरणागतपालक १६ त्वद्दासदासदासानांदासत्वंदेहिमेप्रभो मंत्रेणानेनयःकुर्यान्नारायणप्रदक्षिणं १७ तस्यपुण्यफलंवच्मिसंक्षेपाच्छृणुजैमिने ब्रह्महत्यादिपापा

नीयानियानिमहांतिवै १८ तानितानिविनश्यंतिप्रदक्षिणपदेपदे यावत्पदंद्विज

श्रेष्टगच्छेद्विष्णुप्रदक्षिणां १९ तावत्कालसहस्राणिमोदतेविष्णुनासह हरिंप्रद

क्षिणेयावत्पादंगच्छेच्छनैःशनैः २० पदेपदेश्वमेधस्यफलंप्राप्नोतिमानवः प्र

प्रदक्षिणीकृत्यसर्वसंसारेयत्फलंभवेत् २१ हरिंप्रदक्षिणीकृत्यतस्मात्कोटिगु

णंभवेत् लिंगंप्रदक्षिणीकुर्याद्यस्तुनारायणाग्रतः २२ सोपितत्फलमाप्नोति

किमन्यैर्बहुभाषितं नलंघयेत्सोमसूत्रंधीमान्छंभुप्रदक्षिणे २३ लंघयित्वा

तदाविप्रसाप्तजानिःफलाभवेत् प्रदक्षिणाकारनयाचारैकंयोहरेर्व्रजेत् २४

जन्मजन्मनिविप्रेंद्रसार्वभौमोभवेद्भुवि‍ः यस्तुवारद्वयंकुर्याद्विष्णोर्विप्रप्रदक्षिणं २५ इंद्रस्‍

पदमाप्नोतित्रिदिवेनात्रसंशयः विष्णुप्रदक्षिणंकुर्याद्यस्तुवारत्रयंनरः २६ विमुक्तःसकलैः

पापैःप्रविशेन्माधवींतनुं भ्रामयेत्सोदकंशंखंकेशवोपरिजैमिने २७ अंतेदेवालयंग

त्वासभवेत्सुरवंदितः प्रणम्यदंडवद्भूमौसप्तधायस्तुकेशवं २८ पातकंतच्छरीरस्थंभ

स्मीभवतितत्क्षणात् शिरस्यांजलिमादायप्रणमेद्योजनार्दनं २९ तस्मैर्लक्ष्मीप

तिर्विष्णुर्ददातिपरमंपदं भूमौनिपत्यसर्वांगहरीप्रणामतांनृणां ३० पुण्यप्रभावं

विप्रर्षेगदतोमेनिशामयः यावद्रेणुभिर्नृणांभूषितंस्यात्कलेवरं ३१ तावत्कल्पस

हस्ताणितिष्टंतिहरिमंदिरे ततःकेशवनिर्माल्यंवैष्णवेभ्यप्रतिदीयते ३२ वैष्णवांस्तान्प्र
वक्ष्यामिशृणुसत्तमजैमिने शुकःसूतस्तथाव्यासोनारदःकपिलोमुनिः ३३ प्रल्हादश्चां
वरीषश्चतथाक्रुरोद्धवपुनः बिभीषणोहनूमांश्चमार्कंडेयोयुधिष्टिरः ३४ अश्वत्थामा
कृपश्चैवभीष्मश्चैवधृवस्तथा बलिःसनत्कुमारश्चएतेचान्येचवैष्णवाः ३५ निर्माल्यं
वासुदेवस्यगृह्यंतुसर्वकामदं इत्युक्त्वाविष्णुनिर्माल्यंनिक्षिपेच्छुचिवैष्णवः ३६ शु
भार्थीविष्णुनिर्माल्यंस्वयंगृण्हातिभक्तितः मस्तकेधृयतेयस्याविष्णुनिर्माल्यमुत्तमं
३७ सविज्ञेयोद्विजश्रेष्टसाक्षाद्देवहरिःस्वयं दुर्लभंविष्णुनिर्माल्यंपवित्रंपापनाशनं ३८

गृण्हंतित्रिदशाःसर्वेमानुषाणांचकाकथा जैमिनेतुलसीपत्रंयस्तुजिघ्रंतिवैष्णवः ३९
तस्यदेहांतरस्यापिसर्वपापंविनश्यति तुलसीपत्रगंधस्तुविशेषस्यचनाशिकां ४०
आपादतच्छरीरस्थासद्योगच्छंतिवैष्णवं तुलसीक्षादनघ्राणमाघ्राययोभिनंदते ४१
तस्यालयेभवेन्नित्यमानंदोजनसत्तम स्तवैस्तुत्वाजगन्नाथंकमलाप्रियमस्तकं ४२
कृतांजलिस्ततःप्रातइमंमंत्रमुदीरयेत् नारायणजगद्रूपजगद्धामजगत्पते ४३ गच्छ
देवनिजंस्थानंप्रसन्नोभवसर्वदा येयंस्वशक्त्यादेवेशानवपूजामयाकृता ४४ अच्छि
द्रास्तुजगन्नाथत्वत्प्रसादाद्भयामघ ततःपादोदकंप्राश्नोमहाविष्णोःपरात्मनः ४५

समस्तपातकध्वंसीगृण्हीयाद्भक्तिभावनः क्षणमात्रंवहेद्यस्तुविष्णोःपादोदकंशुभं ४६
सस्नातंसर्वतीर्थेषुजैमिनेसत्यमुच्यते स्पृशंन्पादोदकंविष्णोर्गंगास्नानफलंलभेत् ४७
गांगेयंसलिलंविप्रविष्णुपादोदकंयतः अकालेमरणंनास्तिनास्तिव्याधिभयंतथा
४८ स्पृशतःपादसलिलंकेशवस्यमहात्मनः पापव्याधिविनाशार्थंविष्णुपादोदकौष
धं ४९ पापिनोयेनरास्तेचपिबंतुपतिवासरं विष्णुपादोदकंयस्तुप्रपिबेत्पापवानपि
५० पातकंतच्छरीरस्थंतत्क्षणादेवनश्यति यथौषधेनदेहस्थंहन्यतेदेहिनोविषं ५१
तथैवपातकंसर्वंविष्णुपादोदकेनच विष्णुपादोदकंशुद्धंतुलसीपत्रमिश्रितं ५२ योव

११७

हेच्छिरसाभक्त्यातस्यपुण्यंवदाम्यहं ब्रह्महत्यादिभिःपापैर्विमुक्तोविष्णुरूपभाक्
५३ अंतेविष्णुपुरंगत्वाविष्णुनासहमोदते मेरुप्रमाणंहेमाद्रिदत्वाभवतियत्फलं
५४ विष्णुपादोदकस्पृष्ट्वातत्फलंप्राप्यतेजनैः सप्तद्वीपांमहींदत्वाद्विजेभ्योयत्फलं
लभेत् ५५ तत्फलंलभतेमर्त्योविष्णुपादोदकंस्पृशन् अश्वकोटिप्रदानेनगजकोटि
प्रदानतः ५६ यत्फलंतच्चलभतेविष्णुपादोदकंस्पृशन् दीपिकाकोटिदानेनगजकोटि
टिप्रदानतः ५७ तस्मादप्यधिकंपुण्यंलभेत्पादोदकंस्पृशन् बहुनात्रकिमुक्तेनसंक्षे
पादुच्यतेमम ५८ विष्णुपादोदकस्पर्शान्मुक्तिमाप्नोतिमानवः भूयोभूयोपिपिबि

प्रेंद्रसुहृदं कथ्यतेमया ५९ पुनर्नलभतेजन्मस्पृशन्पादोदकंहरिः दुर्लभंविष्णुनैवेद्यंभुंज
तेद्विजसत्तम ६० देहंत्यजंतर्पयामिब्रह्महत्यादिकानिव भुंजतेहरिनैवेद्यंदासीव
वशगाभवेत् ६१ मुक्तिर्भूषिसुरश्रेष्टदेवनैरपिदुर्लभा संपूज्यकमलाकांतंकिंचि
न्नैवेद्यमत्तियः ६२ अचिरेसौचतंविष्णुनयतिस्वांतनुप्रति नैवेद्यस्यमहाविष्णोर्गु
णंकिंकथयाम्यहं ६३ यद्भजतःकेशवोपिस्यादर्थीनोद्विजोत्तम अनेनविधिना
विप्रप्रतिमासंजनार्दनं ६४ संपूज्यभक्तिभावेनमुक्तिमाप्नोतिमानवः किंवाधनं
चविप्रेषेपूजायांजगतीपतेः ६५ भक्तिसंतुष्टचित्तस्यभक्तिरेवात्रकारणं मूर्खो

११८

वदतिविष्णायधीरोवदतिविष्णवे ६६ द्वयोरपिसमंपुण्यंभावग्राहीजनार्दनः वि
धिहीनामपिश्रेष्टांपूजांश्रीकमलापतेः ६७ यःकुर्याद्भक्तिभावेनसोपिस्यात्केश
वप्रियः विधिज्ञोविधिनाविष्णुमभ्यर्चयत्फलंलभेत् ६८ अविधिज्ञोपिविप्रेंद्र
भक्तश्चेतत्फलंलभेत् यथोक्तविधिनाविप्रनैवेद्यैर्बहुभिःप्रभुः ६९ पूजितोपि
नतुष्टस्याद्यदिभक्तिर्नतिष्टति तस्यवयावतीर्भक्तिर्देवदेवेजनार्दने ७० तावत्से
वफलावाप्तिस्तस्यनास्त्यत्रसंशयः अभक्त्यायाहरेःपूजाक्रियतेभुविमानवैः
७१ विधानेनचसापूजापूजाकालेवहंतिवै ज्ञानंमूलंसेवभक्तिर्भक्तिमूलंजगत्सतेः ७२

स्नामूलकर्मोऽस्यतोमूलमाराधनंहरेः सापिमोक्षकर्मोऽस्यतोमूलमाराधनंयतः ७३ अ
नुमात्रमपिप्राज्ञश्रद्धयाकुरुतेन्वयन् तदक्षयंभवेत्सर्वमत्र ह्याहीनाक्रियायतः ७४
भक्त्यायःपूजयेद्विष्णुंवारत्रयमपिद्विज सुस्थानंलभतेविष्णोर्यतोभक्तिवशोहरिः ७५
असारमेतद्भुवनंसमस्तंसारंहरेःपूजनमेवविप्र तस्मान्मनुष्योनिजमंगलोऽभीप्स-
र्ष्यायजेत्कृष्णमनेकमूर्तिं ७६ इतिश्रीपद्मपुराणेक्रियायोगसारेदशमोध्यायः १०
व्यासउवाच फाल्गुणेब्राह्मणश्रेष्ठश्रीकृष्णंसुरवंदितं पूजयेद्भक्तिभावेनप्रत्यहं
विधिनानरः १ फाल्गुणेस्नापयेद्यस्तुसर्पिषादेवकीसुतं फलंतस्यप्रवक्ष्यामि

मत्तःसम्यङ्गिशामयं २ सर्वयज्ञफलंप्राप्यसर्वदानफलंतथा अंतेयातिहरेःस्थानंस
र्वपापविवर्जितः ३ युगकोटिसहस्राणिभुक्त्वाभोगंहरेर्गृहे तत्रैवमोक्षमाप्नोति
प्राप्यज्ञानमनुत्तमं ४ यस्तुयच्छतिकृष्णायाद्विशाकंगोपमूर्त्तये तिलानांमोदकंदि
व्यंसगच्छेद्धरिमंदिरं ५ योदुग्धलड्डुकंदद्यात्केशवायमहात्मने सपिवेदमृतं
स्वर्गेमन्वंतरशतावधि ६ हरयेललितंखंडंयस्तुयच्छतिजामिने तस्यविष्णुःप्रस
न्नात्माछिनत्तिभवबंधनं ७ विचित्रंफलितंयस्तुददातिहरयेद्विज अंतेचार्कपुरीं
गत्वासभवेत्सुरवंदितः ८ निर्मलांवार्करांयच्छेद्यस्तुकृष्णायभक्तिमान् सक्लिन्न

लभतेविप्रवासुदेवप्रसादतः ९ सुपक्कंफाल्गुणेमासीमधुरंबरदःफलं यस्तुयच्छतिकृ
ष्णायफलंतस्यमयोच्यते १० इहभुक्काखिलंसर्वंपुत्रपौत्रसमन्वितः अंतेगृहंहरे
र्यातिरथमारुह्यशोभनं ११ मदद्याद्गुडसंयुक्तंहरयेबदरीफलं अज्ञानाद्ब्राह्मण
श्रेष्टद्यावन्नारकीभवेत् १२ फाल्गुणेवापियोदद्याद्धरयेगुडपिंडकं सविज्ञेयोद्वि
जश्रेष्ठवाजिमेधसहस्रकृत् १३ फाल्गुणेमासियोदद्याद्धरयेदाडिमीफलं सुप
कंतत्फलंविप्रवदतोमनिरामय १४ तत्रयावंतिबीजानितिष्टंतिदाडिमीफले ता

१२०

वन्मन्वंतरंविष्णोर्गृहेतिष्टतिभाग्यवान् १५ चैत्रेमासिद्विजश्रेष्टमधुनामधुसूदनं

स्नापयेल्लभतेमर्त्यस्तद्विष्णोःपरमंपदं मधुनास्नापयेद्यस्तुनारायणमनामयं नच
चोत्क्रियतेतस्यकदाचिद्विविसृत्न १७ चैत्रेकिंशुकपुष्पेणयोर्चयेत्कमलापति त
न्नामचित्रगुप्तेनपंजिकायांनलिख्यते १८ चैत्रेतुजगतामीशंकृष्णंतिलकपुष्पकैः
यजतोनास्तिवैजन्मपुनरस्मिन्महीतले १९ कृष्णंबकुलपुष्पेणसर्वदेवशिरोम
णिं पूजयेन्मनुजोविप्रलभंतेनापदंक्कचित् २० वासंतिभिःसुगंधाभिवसंतेय
स्तुपूजयेत् भगवंतंपरात्मानंसदेवैरपिपूज्यते २१ सुमनःकिशलयैर्दिव्यैरख
ण्डैर्योर्चयेद्धरिं नंवदंतिसमुत्थायस्वयंपीताद्यमोपिच २२ धात्रीपत्रैर्नवीनै

श्वकोमलैर्हरिमर्चयेत् अचिरेणैवलभतेस लंवांछितंजनः २३ शांडिल्याखंड

पत्रैश्चधत्तुरैस्त्वार्कपुष्पकैः योर्चयेद्विष्णुमीशंवासंसाराब्धिपारगः २४ योद

द्यात्कदलीपक्वंविष्णुकंफलमुत्तमं शाकाद्याश्चिदशाःसर्वेववदुःस्तमहर्निशं

२५ योदद्याच्चेक्कुकेमासीभक्त्यागोपालरूपिणे गोधूमपिंडकंविप्रसर्वपापैःप्रमु

च्यते २६ आयातेमाधवेमासिपवित्रे माधवप्रिये आमिषंमैथुनंतैलंविष्णु

भक्तःपरित्यजेत् २७ प्रातःस्नानंमाधवेमासिवैष्णवः परित्यजेत्परान्नं

चनक्तंकुर्याद्विभोजनं २८ प्रभातेपूजयेद्विष्णुंसर्वांकेविधिनाद्विज वैशाखेस्ना

पयेद्विष्णुपुष्पवारिणा २९ स्नापयेत्सीततोयेषुसंध्यापर्यंकमच्युतं त्रिसंध्यांपूजये

द्भक्त्यानैवेद्यंविविधैःप्रभु ३० वैशाखेमदनस्त्रागिलक्ष्मीपतिरलंकृतः नकिंददा

तिविप्रर्षेप्रसन्नःपरमेश्वरः ३१ वैशाखेमासियोदद्याद्धेवान्नंचक्रपाणये तस्य

पुण्यानुनिसंख्यातुंकः समर्थोस्तिपंडितः ३२ यत्किंचिन्माधवेमासिमाधवप्रीति

माधवे दीयतेमानवैर्विप्रतत्सर्वमक्षयंभवेत् ३३ यदन्यत्सुकृतंकर्मक्रियतेमा

सिमाधवे माधवप्रीतयेविप्रक्षयंतस्यनविद्यते ३४ वैशाखोदुर्लभोमासोधर्मक

र्मफलप्रदः पूजितव्योहरिस्तत्रहित्वाकर्मशतान्यपि ३५ एकाहमपिपूजावैवैशा

खेकुरुतेहरेः शतवर्षैर्हरिर्यष्टायत्फलंलभतेसनत ३६ वैशाखेमासियाकुर्यात

प्रणामाघनतुष्टये दिनेदिनेश्वमेधस्यफलंप्राप्नोतिमानवः ३७ वैशाखेसेवतेनि

त्यंविष्णुमश्वत्थरूपिणं चतुर्वर्गफलाप्राप्तिहेतवेवैष्णवोजनः ३८ गंडूषमात्रतो

येनकुर्यादश्वत्थसेचनं सोपियातिपरंस्थानंविमुक्तःपापकोटिभिः ३९ अश्व

त्थमूलंविमर्षेयोबध्नातिशिलादिभिः अश्वत्थरूपीभगवान्तस्मैकिंनहियच्छति

४० अश्वत्थद्रुममालोक्यप्रणामंकुरुतेचयः आयुर्वृद्धिर्भवेत्तस्यवर्द्धतेसंपद

स्तथा ४१ यश्वत्तलेविप्रधर्मधर्मकर्मविधीयते न्यूनातिरिक्ततानस्यात्तस्मि

न्कर्मणिजैमिने ४२ यत्राश्वत्थतरुस्तिष्ठेदेकोपिशाखिनांवरः अश्वत्थपूजकोय

स्तुसएवहरिपूजकः ४३ अश्वत्थरूपिभगवान्स्वयमेवयतोद्विज तरुज्ञाना

द्विजश्रेष्ठयोश्वत्थंहंतिमूढधीः ४४ संसारेनास्तितत्कर्मयत्कृत्वापिचशुध्यति

अश्वत्थरक्षवायंहरिमूर्तिःप्रकीर्तितः ४५ तस्मादश्वत्थहंतॄणांत्राताकोपि

नविद्यते अश्वत्थस्मरतोविप्रपतयतःस्मशानस्तथा ४६ देहस्थंपातकंसर्वं

हरतेनमतोहरिः विलोक्याश्वत्थहंतारंयःसकोनानिवारयेत् ४७ वाङ्मैौ

स्तेनेविप्रपुंगवयमेनात्याप्नतेस्वयं अश्वत्थछेदिनेमूढमाकुर्विवदेन्नयः ४८

तस्यजिव्हांछुरिकयास्वयंकृंतनिभास्करिः अश्वत्थशाखामेकांयः स्वल्पामपिछि
नत्तिवै ४९ सकोटिब्रह्महत्यानांफलंप्राप्नोतिमानवः यत्पापंब्रह्महत्यायांगुरु
स्त्रीगमनेषुयत् ५० सुरापानेस्तथास्तेयेन्यासापहरणेतथा विश्वासत्तवाक्य
कथनेपरहिंसाधविधौतथा ५१ यज्ञेतरविहिंसायांगणकेदेवलेतथा वेद
हीनंद्विजंमोहाद्यज्ञादिषुप्रवर्त्तके ५२ यत्पापंपरनिंदायांहरिवासरभोजने
अश्वत्थछेदनंतत्पापंप्राप्यतेजनैः ५३ विष्णुमूर्तिजनोमोहादश्वत्थंयोध
मेन्नरः तत्तुल्यःपातकीकोपिनस्कृत्तंक्षितिमंडले ५४ वदाम्यश्वत्थमाहा

त्म्यंसर्वपापविनाशनं सेतिहासंद्विजश्रेष्ठशृणुतत्सुसमाहितः ५५ पूर्वोधनंज
योमन्त्रात्मण्याहरिभक्तिकृत् आसीत्त्रेतायुगेशांतःसर्वप्राणिहितेरतः ५६ ज्ञा
नपूजापरोनित्यंदीनदानरतःसदा सत्यवादीजितःक्रोधोह्यहिंसादंभविवर्जितः
५७ मुमुक्षुःसद्विजश्रेष्ठसर्वदापरमेश्वरं पूजयामासहृदयाभक्त्यानारायणं
प्रभुं ५८ कुतोभक्तिनतोजातुंमहतींसुहृदांप्रभुः जहारसकलंवित्तंहेतुमात्रेण
केनचित् ५९ तथापिसद्विजश्रेष्ठकेशवस्यमहात्मनः पूजामनुदिनंचक्रेभ
क्त्यापरमयासदा ६० मुखेनोपार्जितं--विनष्टंसकलंद्विज दृष्ट्वापितेनवि

मेणदुःखंनार्चितचेतसा ६१ भैक्षेणावर्त्तनंकृत्वासविप्रःपरमार्थवित् महाविष्णोः
सपर्यायांहृष्टंचक्रेमनोनिजं ६२ भूयोपितस्यविप्रस्यभक्तिज्ञातुजनार्दनः चका
रबंधुविछेदंसकृपोपिसमंततः ६३ बंधवात्सल्यविप्रस्यविष्णुमायाविमोहि
ताः हिंसामारेभिरेकर्तुंसर्वदेवद्विजोत्तम ६४ ततःसविप्रोनिर्विण्णोनिर्बंधुः
पुरुषोत्तम पूजयामाससततंप्रीतःप्रचुरभक्तितः ६५ परिकल्प्यसमृद्धंवोध
नंकेशवपूजनं माधवंचजगन्नाथंवैकुंठंभुवमत्यजत् ६६ भूयएवमहाविष्णुः
कौतुकीतस्यजैमिने महारसानुकल्पापिपुत्रानपिदिनेदिने ६७ तथापिस

२४

द्विजश्रेष्ठंकेशवंकुत्रानानातानं पूर्वभक्त्याद्विगुणयाभक्त्यानित्यमपूजयत् ६८ तस्यप
त्नीततोविप्रदुःखशोकाभिदुःखिता विष्णुगेहंततोविष्णोर्माययापरिमोहिता ६९
अथैकाकोसमृद्धेवोविष्णुभक्तिपरायणं विपदंचिंतयामासकदाचिन्नापिनोधि
या ७० एकदासद्विजश्रेष्ठोविष्णुभक्तिसत्तावरः स्कंधेपरशुमादायकाष्ठार्थंवि
पिनंययौ ७१ वनात्काष्ठंसमानीयनित्यमेवसतुद्विज हिमागमेवस्त्रहीनः
कुरुतेशीतवारणं ७२ कदाचिद्विपिनंगंतुंनशक्तोसद्विजोत्तमः जघानप्रा
गणस्थस्यशाखामश्वत्थशाखिनः ७३ अत्रांतरेमहाविष्णुस्तस्मादश्वत्थपा

दपात् निष्कामहं द्विजश्रेष्ठव्यथाव्यथितमानसः ७४ ददर्श विष्णुं पुरतः सचाविर्भ
चतुर्भुजं पीतांबरं कुंडलिनं सुकेशं दधानमब्जादि निजायुधानि ७५ परिस्रवद्विस्र
रक्तधारां सहस्रसंसिक्तसमस्तदेहः ७६ संध्याम्बुशोणीकृतनव्यमेघमिवास्मि
तैर्हीनसुखं परेशं संदृश्यतं देवगणैरदृश्यं नारायणं योगिगणैरचिंत्यं ७७
वर्षाश्रुधाराहरराक्षिषुग्मं तुष्टाव विप्रो मृदुभिर्वचोभिः विप्रउवाच हरे मुरा
रे जगदेकनाथ गोविंद दामोदर वासुदेव ७८ लक्ष्मीपते केशव कांतिराशे ना
रायणानंत विभो प्रसीद तवावतारं किमहं ब्रवीमि तावायाविनानास्ति मुषीह

कोपी ७९ किं वा गुणं व्याप्तसमस्तलोकं किं वादयां मित्रपरैकतुल्यां दत्वा श्रियं
कश्यपिदीशाविष्णो भक्तिं हरस्यच्युत मानवस्थां ८० श्रियं समादाय मदस्मदं
मे भक्तिः प्रदत्ता महती सुधन्यः मन्येहमात्मानमनंतमूर्ते पुण्यात्मनां श्रेष्ठमिवा
निरायत् ८१ पश्येंघ्रियुग्मं भवदीयमेतं न पातकोपश्यति देववंद्यं यद्यप्यहं
दुःखवतां वरिष्ठो मन्ये तथापींद्रिमिवाद्य विष्णो ८२ आत्मानमात्मानजग
तां भवंत्ते साक्षात्समीक्षे हयदीक्षणाभ्यां पूजां तवाहीमापि विभ्रनाहं द्रव्यं क
दाचिन्न ददामि तुभ्यं ८३ तथापि जाग्रे मम मूर्तिमांस्त्वं पश्यस्त्वमे कोल्पनएव हृ

ज्यः दत्तस्त्वयायंममभक्तिदृक्षोधर्मार्थकामत्रयचारुशाखः ८४ त्वद्दर्शनांभोमयदृष्टिकः
कालेप्रभोमुक्तिफलंददासि मूर्द्धिमदीयेखिललोकमूर्द्धन्श्रेष्ठोभेभवान्केशवविश्वमू
र्ते ८५ त्वत्पादपाथोयुगेमनोज्ञेभृंगायतेसंप्रतिदेवसेव्यैः इत्थंस्तुत्वाजगन्नाथ
लोकानुग्रहकारक कस्यप्रहरणैरेतदंगतेरुधिरोक्षितं ८६ सर्वेषामेवदैत्यानांयु
धिकंशास्त्वयाहताः त्वांहंतुंकःक्षमपृथ्व्यांप्रभोद्भुतमिदंमहत् ८७ श्रीभगवा
नुवाच वत्ससत्यमिदंप्रोक्तंत्वयानास्त्यत्रसंशयः दानवाराक्षसावापिमांहंतुंके
पिनक्षमाः ८८ अश्वत्थमूर्त्तिरेवाहकुठारेणाहतस्त्वया अतोजातोशरीरेमेर   १२६

क्तपातोधुनाद्विज ८९ व्यासउवाच तस्यवाक्यमिदंश्रुत्वासविप्रोभयविह्वलः नि
निंदस्वयमात्मानंमात्मनाबहुधाद्विजः ९० धिगस्तुमांहतभाग्यंसर्वपातकिनांवरं
त्रैलोक्याधिपतेर्दत्ताहृदयेमहतीव्यथा ९१ प्रसादयंतियंदेवाब्रह्माद्याश्चातिभ
क्तितः अतोमयापापवार्त्तातस्यदत्ताहृदिव्यथा ९२ यस्मिन्प्रसन्नेदेवेंद्रपर
मंधामलभ्यते मयाविवेकिनातस्यहृदयेजनिताव्यथा ९३ सर्वपापहरोविष्णुः
समयाव्यथितःकृतः यत्तत्पापंमयापारंगंतुंवैकेनशक्यते ९४ यस्मिंस्तुष्टेपा
पिनोपिभवंतिसुरवंदिताः मद्वत्तयापिव्यथयाव्यथितोहाहतोस्म्यहं ९५ किंता

पोभिजपैःकिंवाकिंगृहेहेजीवनैश्वर्यैःकिं धर्मार्थकाममोक्षाणांदाताचापिव्ययातुरः ९६ इत्यु
क्तोसद्विजश्रेष्ठस्तमेवपरश्रुंनिजे दातुंकंठेमनश्चक्रेविष्णुप्रीणनहेतवे ९७ तस्यम
किंदृढांज्ञात्वादयालुःसकमलापतिः तद्धस्तात्परशुंनिन्येजवेनतमुवाचसः ९८ श्री
भगवानुवाच कथंत्वमेवंकुरुषेवत्सकर्मातिदारुणं आत्महत्याकृतांपुंसांसुश्रेस्मिन्
कदाप्यहं ९९ तवभक्त्यास्तुतिनितुष्टोस्मिभक्तिमाकुरुसत्तम वरंवरयविप्रेंद्रयत्ते
मनसिवर्त्तते १०० ब्राह्मणउवाच मयाव्यथाप्रदत्तेयंमहतीपरमेश्वर मातिष्ठतु
शरीरेतेयाचेवरमिदंप्रभो १०१ भगवानुवाच अज्ञात्वाभवतावत्सकर्मेदंवि

२७

हितंद्विज अतोपराधोनंतव्योमहानपिनतेमया १०२ नित्यंतवानुकल्पोस्मिभव
श्रेष्ठोयतोमहान् भवदीयानहंमन्येदोषानपिगुणानिव १०३ हृतानितववित्ता
निसकलान्येवमायया कृतश्चबंधुविच्छेदोहृताश्चतवसूनवः १०४ नानादुःख
प्रदत्तंतेमयावत्सदिनेदिने तथापिममभक्तिस्तेववृद्धेमहतीतदा ५ तस्माद्धत्स
तवानृण्यंगंतुमिच्छामिसंप्रति विहायसकलांभीतिवरंवृणुममागतः ६ ब्राह्म
णउवाच त्वयिसर्वसुरश्रेष्ठममजन्मनिजन्मनि जायतांसुदृढाभक्तिर्हरेकिंपरै
र्वरैः ७ व्यासउवाच श्रुत्वावाक्यमिदंतस्यकेशवःपणयोदितं निजकंठस्थि

तामालग्यप्रीतस्तस्मैददौततः १०८ तमालिंग्यततोविष्णुःपितापुत्रमिवप्रभुः चतुर्भि
र्बाहुभिःस्वीयैरुवाचमृदुलंवचः १०९ मद्भक्तोसियथावत्सतथात्वंमत्प्रसादतः अ
चिरेणैवसकलंमद्रूपिप्राप्स्यसिविष्यति ११० अश्वत्थमूर्तिमान्नित्यंक्रियायोगेनसत्त
म समाराधयसर्वंतेसाधयिष्यामिवांछितं ११ इत्युक्त्वातंद्विजश्रेष्ठंभूयोप्या
लिंग्यकेशवः अभवत्सहसादृश्यस्तत्रैवकरुणामयः १२ विष्णुकंठस्त्रजंप्राप्यसंवि
प्रोवैश्मवोजनः कृतकृत्यमिवात्मानंमत्वातस्थौनिजेगृहे १३ ततःकुबेरोविप्रर्षे
तस्यविप्रस्यवेश्मनि स्वयंविवर्षवित्तानबहूनिकेशवाज्ञया ११४ प्रासादारचिता

स्तस्यशिल्पिनाविश्वकर्मणा नारायणाज्ञयातस्यजयंतस्त्वसन्नम ११५ दासीदाससमा
युक्तंनानारत्नविभूषितं गजाश्वकोटिसंकीर्णविभवोत्तस्यमंदिरे १६ कृतावज्ञापि
तत्पत्नीस्वयंतद्गृहमाययौ मृतवत्सापितत्पत्नीकेशवस्यानुकंपया १७ स्थिरप्रजा
भवद्विप्रो विभक्तिपरायणः चिरंभुक्त्वाविरलान्भोगान्पुत्रपौत्रसमन्वितः ११८
आयुषांतेययौमोक्षंसदारोद्विजसत्तमः व्यासउवाच साक्षाद्देवःस्वयंविष्णुरश्वत्थो
खिलवृक्षराट् ११९ तद्भक्तंकुरुतेपुंसोनाशुभंविद्यतेक्वचित् अश्वत्थसेवनेयस्तु
विष्णुबुध्याद्विजोत्तम १२० तस्यप्रसन्नोभगवान्ददातिपरमंपदं अश्वत्थमाहि

माविप्रकथितंतेसमाहितः १२१ सर्वंकुर्वंतुतत्सेवायदिवांछतिसद्गतिं १२२ इतिश्रीप

द्मपुराणेक्रियायोगसारेएकादशोध्यायः ११ व्यासउवाच ज्येष्ठेमासिद्विजश्रेष्ठभग

वंतंजनार्द्दनं पूजयेद्भक्तिभावेनजलेसंस्थाप्यशीतले १ उद्वर्तनंचदातव्यंसुगंधा

मलकीतथा तैलंसुगंधंहरयेग्रीष्मकालेदिनेदिने २ सुवासितेशीतलेचतंमंदिरे

तिमनोहरे प्रत्यहंकमलाकांतंस्थापयेज्जलमंडपे ३ नरोद्विहोविप्रेंद्रसधूमेबंध

नालये नसूतिकागृहेस्थस्थापयेत्कमलापतिं ४ चामरैर्वीजितःश्रेष्ठैःसुदीपैः

मल्पपतिः ज्येष्ठेमासिद्विजश्रेष्ठसुप्रीतःकिंनयच्छति ५ मयूरंपक्षमरुतैर्निदाघे

वीजितोहरिः तदात्यभिमतंसर्वमचिरेणैवसत्तम ६ तालवृंतकवातेनपवित्रासुखा

युना येग्रीष्मेवीजितोविष्णुस्तेसर्वेस्वर्गगामिना ७ योगात्रलेपनंकुर्यात्सुगंधैर्य

क्षकर्द्दमैः ग्रीष्मेहरेश्चंदनैश्चसविशेन्माधवींततु ८ गंधैर्मृगमदाद्यैश्चयोलिंपे

न्माधवींतनुं युष्मागमेद्विजश्रेष्ठसमुक्तोनात्रसंशयः ९ प्रफुल्लकुसुमोद्यानेतुल

सीकाननेतथा संध्यायांस्थापयेद्विष्णुंदेशोर्धीरसमीरणे १० स्रग्भिःपाटलिपुष्पा

णांयेनविष्णुरलंकृतः ज्येष्ठेमासिसविज्ञेयोवाजिमेधसहस्रकृत् ११ यस्तुमुक्ता

वलिंदद्याग्ग्रीष्मेश्रीपतयेजनः भूपालस्त्वंहरिस्तस्मैयच्छेजन्मनिजन्मनि १२ यस्तु

मंज्यतिग्रीष्मेश्रीकृष्णंमणिमालया तस्पुण्यंवदतोमे — निशामय १३ यावद्भूत्यास्तुजन्ते

तज्जैमिनेसकलंजगत् तावद्दिवसुवरेतिष्ठन्मणिमालाविभूषितः १४ सुवर्णाभरणै

र्यस्तुरजताभरणैस्तथा कृष्णंमंज्यतिग्रीष्मेसोपितत्फलमाप्नुयात् १५ प्रयच्छति

विचित्रंयः पर्यंकंसोपबर्हणं हरयेद्देवदेवायनस्यादुःखीकदापिसः १६ ग्रीष्मका

लेनदेयानिगुरूनिवसनानिच हरयेब्राह्मणश्रेष्ठदेयंतत्तंशुकंशुभिः १७ यस्तुवृ

न्तफलैःपक्कैर्योर्चयेत्कमलापतिं सोपितत्फलमाप्नोतिकिमन्यैर्बहुवासितैः १८ नि

दाघेहरयेदद्यात्यवागुमतिशीतलं नानाव्यंजनसंयुक्तंयद्वपावैष्णवोजनः १९

आषाढेमासिविप्रेंद्र — देवंजगद्गुरुं दधिभिःस्नापयित्वाथपूजयेद्भक्तितोबुधः २०

दधिभिस्नापयेद्यस्तुभगवंतंजनार्दनं मतुःपयोधरपयःपुनस्तेननपीयते २१ धा

नागमेघनश्यामंकदंबकुसुमैर्हरिः आराध्ययांतिविप्रर्षेपापिनोपिपरांगतिं २२

कदंबपुष्पमालाभिमंज्यत्यजलोचनं यस्तस्यब्राह्मणश्रेष्ठपुण्यंवच्मिनिशामय

२३ तस्यांयावंतिमालायांतिष्ठंतिकुसुमानिवै प्रतिपुष्पेद्विजश्रेष्ठवाजिमेधफ

लंलभेत् २४ सुगंधैःकेतकीपुष्पैःपूजितःकमलेक्षणः सर्वदुःखंहरत्येवमानवा

नांद्विजोत्तम २५ कृष्णायनवनीतंयोददातिवैष्णवोजनः तस्यपुण्यंनसंख्या

लुंशाङ्क्षोम्यद्देशनैरपि २६ हैयंगवीनंयोदद्यात्ङ्गोपालायमहात्मने आमिक्षागुडसं
युक्तासमहात्मांहरिप्रियः २७ सशर्कराणिदुग्धानिरुक्मायपयस्तुयच्छति नस्यप्रस
न्नोभगवान्ददात्यमिमतंफलं २८ श्रावणेमासिविप्रेंद्रदेवकीनंदनंप्रभुं स्नापये
न्निर्मलस्तोयैस्शुद्धैःकलुषवर्जितैः २९ मल्लिकाकुसुमैर्विष्णुंयोर्चयेद्दैष्णवोजनः
विमुक्तःसकलैःपापैर्ब्रह्मलोकंसगच्छति ३० सेफालिकाप्रसूनैश्चयूथिकाकुसु
मैस्तथा योर्चयेत्परमात्मानंतस्यपुण्यंजगत्त्रये ३१ प्रफुल्लैर्मालतीपुष्पैःसुगंधै

योर्चयेद्धरिं तत्पुण्येनसमंनास्तियेनस्याद्भुविमानवः ३२ कुंदपुष्पैश्चबंधूकैर्जग

द्बंधुंजनार्द्दनं अर्चयंसकलंकाममामोतिभुविमानवः ३३ महामहाप्रसूनैश्चतथाकु
रवकैर्हरिं कुरंटकैश्चपुष्पैश्चतस्यतुष्टःसदाहरिः ३४ यविययकैश्चयोविष्णुंप्रस्य
पुष्पैश्चयोर्चयेत् करवीरप्रसूनैश्चसयातिविष्णुमंदिरं ३४ श्रावणेमासियोद
द्यालाजान्घृतमन्वितान् हरयेतस्यविप्रर्षेनविपत्तिगृहेभवेत् ३५ श्रावणेपिष्ट
कंयस्तुहरयेसुगंधधूपकं ददातितस्यविप्रर्षेगृहेश्रीर्निश्चलाभवेत् ३६ भाद्रे
मासिद्विजश्रेष्ठनारायणमनामयं श्रद्धयापूजयेत्प्राज्ञश्चतुर्वर्गफलप्रदं ३७
निभृतेश्चतमागारेसर्वोपद्रववर्जिते स्थापयेत्पुंडरीकाक्षंभगवंतंजनार्द्दनं ३८

दंशैश्च मशकैश्चैव प्रकीर्णं मक्षिकादिभिः हरिं पुरातनागारे स्थापयेन्नव भक्तिमान् ३९
स कर्दमे पतद्वारि गलद्भीतो गृहे तथा हरिं न स्थापयेन्मूढो वर्षासु परमेश्वरं ४० दे
वालये द्विजश्रेष्ठ बध्नीयाद्यस्तु मानवः चंद्रातपविचित्रं च चंद्रलोकं स गच्छति ४१
एतैर्नानाविधैः पुष्पैः मंदिरे जगतीपतेः दंशांश्च मशकांश्चैव वर्षाकाले निवारयेत्
४२ मसूरिकाभिः प्रावृत्य मंचशायिनमच्युतं प्रावृषि स्थापयेद्विष्णुं निवातायां दिव्य
मंदिरे ४३ कल्हारपत्रैर्देवेशं सुगंधैर्नूतनैस्तथा मुमुक्षुः पूजयेन्मर्त्यो भाद्रे मासि
दिने दिने ४४ नभाद्रे केतकीपुष्पैः पूजितो यो जनार्दनः यतो भाद्रपदे मासि केतकी

स्यात्सुरासमाः ४५ पक्वैस्तालफलैर्दिव्यैर्योऽर्चयेद्यदुनंदनं गर्भवासं महद्दुःखं
स भूयो लभते न हि ४६ संयुक्तं घृतदुग्धाभ्यां पक्वतालं सुरारये यो दद्याच्छ्रद्धया
मर्त्यः स गच्छेद्धरिमंदिरं ४७ भाद्रे मासि द्विजश्रेष्ठ हरये तालपिष्टकं सघृतं वैष्णवो
दद्यात्कैवल्यप्राप्तिहेतवे ४८ मासि भाद्रपदे विप्र न कुर्यान्मुमुक्षुवै अश्विने मा
सि विप्रेंद्र केशवं कुशनाशनं ४९ पूजयेद्भक्तिभावेन पूर्वोक्तविधिना द्विजः पूर्वा
ह्णे पूजयेद्यस्तु भक्त्या लक्ष्मीपतिं मुदा ५० विष्णुपूजाफलं विप्र संपूर्णं तेन लभ्य
ते यतो यं दीयते विप्र पूर्वाह्णे हरये जनैः ५१ पीयूषमिव तत्तोयं गृह्णाति कम

लापतिः मध्याण्हेदीयंतेयस्तुसलिलंचक्रपाणये ५२ तोयंतोयमिवस्वंमीतद्गृण्हातिद्वि
जोत्तमः अपरान्हेतुयत्तोयंगोविंदायप्रदीयते ५३ ततोयंरक्ततुल्यंस्यान्नगृण्हाति
ततोहरिः अनएवद्विजश्रेष्ठपूर्वान्हेहरिमर्चयेत् ५४ समस्तंलभतेकामंकेशवस्या
नुकंपया एकवस्त्रेणविप्रेंद्रनकुर्यात्पूजनंहरेः ५५ कुर्यादपितदपूजांतन्नगृण्हा
तिकेशवः अधौतेनचवस्त्रेणयापूजाक्रियतेहरेः ५६ विफलासाचपूजास्यान्नच
विष्णुःप्रसीदति यस्त्ववद्धशिखःपूजांचक्रिणःकुरुतेजनः ५७ पूजाफलंनचा

प्नोतिविनिग्राह्यावसाभवेत् असंस्कृतगृहेयस्तुपूजनंक्रियतेहरेः ५८ तत्पूज
नंद्विजश्रेष्ठविनियासंभवेत्खलुः स्नानंदेवार्चनंचैववंदनंपितृतर्पणं ५९ तिल
केनविनाविप्रकुरुतेनविचक्षणः तिलकान्यंगृहीत्वायत्पुण्यकर्मविधीयते ६०
भस्मीभवतितत्सर्वंकर्त्ताचनारकीभवेत् शंखचक्रगदापद्मैरंकितंयस्यदृश्यते
६१ शरीरंब्राह्मणंश्रेष्ठविज्ञयःसोच्युतःस्वयं योलिखेद्दक्षिणेबाहौशंखपद्म
चवैष्णवः ६२ सव्यचक्रंगदांचैवसविष्णुर्नात्रसंशयः योलिखेद्दक्षिणेबाहौशं
खंपद्मंचवैष्णवः ६३ पंकजंदक्षिणेबाहौशंखस्योपरियोलिखेत् पातकंसकलं
तस्यतत्क्षणादेवनश्यति ६४ चक्रोपरिगदांयस्तुलिखेत्सव्यभुजेजनः संव

दंतिद्विजश्रेष्ठशक्राद्याअपिनिर्जरा मुरारिपादयुगलंसुललाटेलिखेद्बुधः पापाअपिच
तद्दृष्ट्वामुक्तोभवतिपातकात् ६५ अष्टाक्षरमहामंत्रमच्छकूर्मोचयोहृदि लिखेत्स
वैष्णवश्रेष्ठःपुनातिभुवनत्रयं ६६ कृष्णायुधांकितंयस्यशरीरंस्याद्दिनेदिने
तस्यतुष्टोजगन्नाथोददामिपरमंपदं ६७ कृष्णायुधांकिततनुर्यत्कर्मकुरुतेजनः
शुभंवाप्यशुभंवापितत्सर्वमक्षयंभवेत् ६८ दानवाराक्षसाश्चैवभूतावेतालिका
स्तथा पिशाचापन्नगाश्चैवभूताःप्रेतास्तथापरे ६९ किन्नरागुह्यकाश्चैवग्र
हाबालग्रहास्तथा कूष्मांडश्चैवडाकिन्योयेचान्येविघ्नकारकाः ७० सर्वेभी

त्यापलायंतेदृष्ट्वाकृष्णायुधांकितं द्वीपाश्चहिंस्रिनश्चैवतथान्येवनजंतवः ७१ तेसर्वे
प्रपलायंतेदृष्ट्वाकृष्णायुधांकितं कामलाद्यामहारोगादेहेदेहमिघातिनः ७२
कृष्णायुधांकितंयस्तुतनुमत्स्यावपश्यति कृष्णदर्शनतुल्यंसप्राप्नोतिजैमिनेफलं
७३ त्रिपत्रीकृतदूर्वाभिराश्विनेयोर्चयेद्धरिं पूर्ववसंततिस्तस्यअविछिन्नाप्रजा
यते ७४ आश्विनेमासियोदद्याद्हरयेककटीफलं रोगोकोनजायतेतस्यकदा
विद्दरयेद्विज ७५ कार्तिकेचसमायातेसर्वमासोत्तमेशुभे दामोदरंमहादेवं
भक्त्याप्राज्ञःप्रपूजयेत् ७६ कार्तिकेमासिविप्रेंद्रविष्णुप्रीणनहेतवे यथोक्तं

विधिनाप्राज्ञःप्रातःस्नानंसमाचरेत् ७७ अमिषंमैथुनंचैवकार्त्तिकेमासियस्त्यजेत्
जन्मांतरैर्जितैःपापैर्मुक्तोयातिपरांगतिं ७८ तुलाराशिगतेसूर्येप्रातःस्नानंद्विजो
त्तम हविष्यब्रह्मचर्यंचमहापातकनाशनं ७९ अमिषंमैथुनंचैवकार्त्तिकेयस्तुन
त्यजेत् जन्मजन्मानिविप्रेंद्रसभवेद्ग्रामसूकरः ८० द्विर्भोजनंपरान्नंचतैलंच
वैष्णवोजनः आयातेकार्त्तिकेमासियत्नादपिपरित्यजेत् ८१ दामोदरायनभ
सिप्रदीपंयःप्रयच्छति फलंतस्यप्रवक्ष्यामिससेनशृणुयत्नतः ८२ ब्रह्महत्यादिभिः
पापैर्विमुक्तःक्लेशदायकैः दामोदरपुरंगत्वानिष्टेत्कोटियुगावधि ८३ दीपंज्वलंतं

नभसित्रिदशावासवादयः विलोक्यहर्षितासर्वेवदंतीतिपरस्परं ८४ असौपुण्या
त्मनाश्रेष्ठःकेशवार्चनतत्परः प्रदीपंकार्त्तिकेमासीयच्छेद्दामोदराययः ८५ आग
मिष्यतिपुण्यात्माकदायंत्रिदिवंप्रति करिष्यामिकदासख्यमनेनहरिसविना ८६
दामोदरापयोदद्यान्मूहूर्त्तमपिकार्त्तिके दीपंनभसिविप्रर्षेतस्यतुष्टःसदाहरिः
८७ दद्याद्दक्षयेदीपंयःकार्त्तिकेहरिमंदिरे दिनेदिनेश्वमेधस्यफलंप्राप्नोतिमा
नवः ८८ बिल्वच्छदनलक्षेणयोर्चयेद्धिसुमव्ययं कार्त्तिकेवाकरंवापिपाल्यतेसो
पितत्फलं ८९ तुलसीदललक्षैर्यःकार्त्तिकेपूजयेद्धरिं लक्षैकवाजिमेधस्यफलंप्राप्नो

तिमानवः कार्त्तिकेवरपुष्पेणहरिपूजनकृन्नरः दामोदरंकार्त्तिकेयःपूजयेदुदकपुष्पकैः
९१ परमंमोक्षमाप्नोतिप्रसादाज्जगतीपतेः यत्किंचित्कार्त्तिकेमासिविष्णुमुद्दिश्यदी
यते ९२ तदक्षयंभवेत्सर्वंसत्यमेतन्मयोच्यते घृतान्कंस्मरणंयोवैकार्त्तिकेमासि
विस्मवे ९३ दद्यात्दिनेदिनेविप्रतस्यविष्णुपरेस्थितिः प्रफुल्लपद्मपुष्पेणासितेनाप्य
सितेनवा ९४ दामोदरंकार्त्तिकेयःपूजयेद्यातितत्पदं कमलैःकार्त्तिकेमासिसिते
र्वालोहितैस्तथा ९५ दामोदरंसमभ्यर्च्यलभेन्मर्त्यःपरंपदं प्रदत्तंकार्त्तिकेमासि
हरयेनवपंकजं ९६ नदत्तंतेनकिंविप्रविष्णवेदैत्यजिष्णवे एकमेवांबुजंयस्तु

ददातिकैटभारये ९७ तस्मैकिंभगवान्विष्णुर्नददातिश्रियःपतिः कमलैःकार्त्ति
केमासीयेननाराधितोहरिः ९८ जन्मजन्मनितद्देहेकमलानहितिष्ठति पद्म
बीजानियोदद्यात्केशवायमहात्मने ९९ सजायतेविप्रकुलेश्रुडेवमतिजन्मनि
ब्राह्मणस्यकुलेजातःसचतुर्वेदविद्भवेत् १०० धान्यवांश्चधनीपुत्रीकुटुंबानां
चपोषकः नास्तिपद्मसमंपुण्यंजैमिनेसत्यमुच्यते १०१ येनसंपूज्यगोविंदपाप
त्मापिचमोक्षभाक् पद्मपुष्पस्यमाहात्म्यंविशेषमुच्यतेमया १०२ निशामय
द्विजश्रेष्ठसेतिहाससमाहितः आसीदेकद्विजोनामब्राह्मणःसर्वशास्त्रवित् ३

हरिपादांबुजेतस्यमनोभृंगइवास्थितं देवानांब्राह्मणानांचगुरूणांतेनसर्वदा १०४

कृतांपूजांद्विजश्रेष्ठत्यक्त्वाकार्यशतान्यपि परद्रव्यंविषंचैवपरपत्न्यास्वमातरं १०५

कृतंतेनैवतज्ज्ञानंतथामित्रेचबान्धवे आयातमतिथिंदृष्ट्वासविप्रःपरमार्थवित्

६ भृशामानंदमाप्नोतियाचकंचद्विजोत्तम सर्वेयज्ञाःकृतास्तेनव्रतानिविविधा

नि च ७ संसारसागरंघोरमपारंचतितीर्षुना एकदासद्विजश्रेष्ठोहरिभक्तिपराय

णः ८ सुप्तःप्रबुध्यनिजांजातिंचिंतयामासचेतसा कोहंपूर्वंस्थितःकोवाकिंवाकर्मकृतंपु

रा ९ कथंवाजन्मसंप्राप्तंक्ववायास्याम्यहंमिति इतिसंचिंत्यविप्रोसौनिःश्वसंश्चमुहुर्मुहुः

१३७

१० विज्ञातुंपूर्ववृत्तांतंशिवक्षेत्रंजगामह तत्रबध्वांजलिर्विप्रोभक्त्यापरमयानतः ११ तुष्टा

वशंकरंदेवंवाचामधुरयाप्रियं ब्राह्मणउवाच नमस्तुभ्यंमहादेवनमस्तेपरमेश्वर १२

नमस्तेशंकरेशायनमस्तेवरदप्रभो नमस्तेज्ञानरूपायनमस्तेज्ञानदायिने १३ नम

स्तेसर्वभूतेशाहृदंबुजनिवासिने जगत्स्रष्ट्रेनमस्तुभ्यंजगत्त्रातायतेनमः १४ नमः

संसारसंहंत्रेपशूनांपतयेनमः नमस्तेवह्निनेत्रायनमस्तेपद्मचक्षुषे १५ नमस्ते

चंद्रनेत्रायनमस्तेसूर्यचक्षुषे नमस्तेभस्मभूषायनमस्तेकृत्तिवाससे १६ नमो

स्तुमालिनेतुभ्यंनीलकंठायतेनमः नमस्तेपंचवक्त्रायनमस्तेशूलपाणये १७

पथिनेचनमस्तुभ्यंनागयज्ञोपवीतिने वृषध्वजायवैतुभ्यंद्विभुजायनमोस्तुते १८ क
पालिनेनमस्तुभ्यंस्मशानवासिनेनमः कंदर्प्पदर्पविध्वंसकारिणेभीममूर्त्तये १९ नम
स्तेदेवदेवायनमस्तेत्रिपुरारये पार्वतीपतयेतुभ्यंनमस्तेविश्वमूर्त्तये २० वाणभक्ता
तिसंतुष्टमानसायनमोस्तुते नमस्तेबहुरूपायनिरूपायनमोनमः २१ गंगाधराय
वैतुभ्यंदक्षयज्ञविनाशिने पिनाकिनेनमस्तुभ्यंभूतानांपतयेनमः २२ अहृत्रयाय
वहृत्रयायमुनीशानीश्वरायच अचिंत्यायचचिंत्यायजगद्रूपायतेनमः २३ ब्रह्म

त्वमेवत्रिदशोकनाथस्त्वमेवविष्णुस्तपनस्त्वमेव त्वमेवसोमःसकलार्त्तिहारिसमस्त

भूताघविनाशकारी २४ इत्येवंस्तवमाकर्ण्यशंकरोलोकशंकरः आविर्बभूवसहसा
प्रसन्नःपरमेश्वरः २५ आविर्भूतंतमालोक्यसर्वलोकनमस्कृतं ववंदेचरणौतस्य
सविप्रोत्यंतहर्षितः २६ भूयोपिसद्विजश्रेष्टोहर्षनिर्भरमानसः कृतांजलिर्महादे
वंतुष्टाववरदंप्रभुं २७ ब्राह्मणउवाच यन्नपश्यंतिदेवेशादेवाअपिसवासवाः
पश्यामितमहंसाक्षान्महद्भाग्यमिदंमम २८ यन्नामस्मरणादेवमहापातकिनो
पिच यांतिधामपरंसाक्षात्समीक्षेतमहंशिवं २९ कृतार्थोस्मिकृतार्थोस्मिकृता
र्थोस्मिनसंशयः महादेवनमस्तुभ्यंनमस्तुभ्यंप्रसीदमे ३० शिवउवाच भव

तोनेनवाक्येनसंतुष्टोस्मिहिजोत्तम वरंवृणीष्वभद्रंतेयत्तेमनसिवर्त्तते ३१ आत्मणउवाच
भवंतंपरमात्मानमदृश्यंदेवतैरपि साक्षात्पश्याम्यहंनाथकिंकार्यममरैर्वरैः ३२ तथा
पित्वंवरंदित्सुयदिमेकृपयाप्रभो कर्मणाप्राप्यतेदेहोदेहीपापेनलिप्यते ३३ पुनःपा
पप्रभावेनप्राप्यतेविषमांगतिं प्रभावैःकर्मणांकेनांगाजन्मप्राप्तमिदंमया ३४ नाना
दुःखप्रदंनाथप्रसन्नोब्रूहिमेप्रभोपापमूलमिदंजन्मजन्मदुःखस्यकारणं ३५ ज्ञातु
मिच्छाम्यहंतस्यास्पूर्ववृत्तांतमात्मनः स्थितोहंजननीकुक्षौजठरानलतापितः ३६
मूत्रविष्टाप्रकीर्णेचपिनाकिकेनकर्मणा गर्भवाससमंस्मार्दुःखंसंसारेनैवविद्यते ३७

कथंमयानुभूतंतत्प्रभोभक्तार्तिनाशन संसारेस्मिन्महाघोरेमनोदुःखसमन्विते ३८ अ
सारेमासयथाविष्णोमोहितेपातकाश्रये दुस्तरेबंधुहीनेचकामक्रोधादिसंयुते ३९
शोकरोगप्रदेचैवजगन्मृत्युप्रदेतथा अपारेजगतामीशापतितोहंकथंप्रभो ४० ए
तत्सर्वंविभोब्रूहियदितेमय्यनुग्रहः श्रीभगवानुवाच पद्यप्येतद्द्विजश्रेष्ठशावरा
न्वयसंभवः दंडपाणिरितिख्यातःसल्लोकदुःखदायकः परलोकभयंत्यक्त्वाविवे
कपरिवर्जितः ४२ दस्युवृत्तिप्रसन्नोसिपरमक्रूरदायिनीं दस्युवृत्तिंज्ञातंदृष्ट्वा
भवेतमतिनिर्भयं ४३ अपरेभ्रातरःखङ्गबभूवस्तवदस्यवः तेषानामानिवि

र्मैद्भ्रातॄणानिगदाम्यहं ४४ येसार्द्धंभवतःपूर्वोभ्रातृभिर्दस्युताहृता दंडोदंडआयुध
श्चैवदंडवान्दंडहृत्तथा ४५ सुदंडांदंडकेतुश्चभ्रातरःषट्प्रकीर्त्तिताः भ्रातृभिस्तै
महाघोरैर्दयाभिःपरिवर्जितैः ४६ कृत्येनभवतानित्यसर्वेवश्यीकृताजनाः धन
लोभेनभवताहुष्टैस्तैर्भ्रातृभिःसह ४७ अरण्येप्रांतरेविप्रनिहिताःकोटिकोटिशः
हस्ताच्चसायकैस्तीक्ष्णैर्वनस्थेनत्वयासदा ४८ गवांकव्याणिभक्तानिमदिराभिः
सहद्विज यातयातविधिःसर्वेवानिजास्तत्यजुस्तदा ४९ तद्भयाद्विपिनेस्तस्मि
न्नन्येचपथिकास्तथा यस्यविहन्ननहिलिंगहंयस्यनतद्गृहं ५० यस्यभार्यानित

द्वार्यात्वयिदस्युसमागते एकदाभ्रातृभिस्तैस्तुतस्मिन्नेवमहावने ५१ ततोवर्त्म
श्रमश्रांतस्नानार्थत्वंजलाशयं तत्रस्नानंसमाचर्यक्षुधितेनत्वयाद्विज ५२ भक्षि
तानिमृनालानिभ्रातृभिस्तैर्जलानिच अथत्वयाद्विजश्रेष्ठकौतुकानन्नसत्तम ५३
त्वयाचित्राणिपुष्पाणिप्रफुल्लानिबहूनिच ततस्मिन्नेवतनःकालेब्राह्मणोवल्क
लांबरः ५४ सर्वदेवद्विजनिख्यातस्तत्रस्नानार्थमागतः स्नानंकृत्वासधर्मात्माद्दामो
दरमनामयं ५५ यष्टुंत्वामेकमंभोजंययाचेविनयान्वितः ततस्त्वयापिविप्र
र्षेपद्मपुष्पंसुनिर्मितं ५६ प्रदत्तपरयाभक्त्यापूजार्थंजगतीपते त्वयादत्तेनपु

षेणप्रीतोदामोदरस्यच ५७ दामोदरंतुतत्रैवपूजयामासकामदं दामोदरार्चकंविप्रं
दृष्ट्वातत्सर्वमेधसं ५८ दामोदरंभवांस्तत्रनन्नाममहसन्प्रभु दामोदरमयाभ्यर्च्य
चतुर्वर्गफलप्रदं ५९ यथोक्तविधिनाविप्रःसजगामयथागतः तेनांबुजप्रभावेन
प्रणामेनचसत्तम ६० दामोदरार्चकंदृष्ट्वानष्टंतेसर्वपातकं ततःकियद्भिर्दिवसै
स्तस्मिन्नेवमहावने ६१ संप्राप्तःकालपंचत्वंभवानेवजगामह तेनैवकर्मणातु
ष्टोदामोदरःसदप्रभुः ६२ ददौतुभ्यंपरंधामदेवैरपिसुदुर्लभं मन्वंतरसहस्रा

णिमन्वंतरशतानिच ६३ दामोदरप्रसादेनभुक्तंनानासुखंत्वया ततःकर्मा

वसानेतुकर्मभूमिमिमांद्विज आगत्यतेपुण्यफलैर्जातोसिद्विजसंततौ ६४ ब्राह्मण
स्यकुलेशुद्धेजन्मसंप्राप्यसत्तमं सर्वेगुणास्त्वयाविप्रभक्तिर्दामोदरेपिच ६५ आ
राधितःक्रियायोगेदामोदरप्रभुस्त्वया तुभ्यंदास्यतिसज्ज्ञानंज्ञानान्मुक्तोभविष्य
सि ६६ गछब्राह्मणभद्रंतेसुप्रीतोनिजमंदिरे मद्दर्शनंत्वयाप्राप्तंमुक्तोसिभव
बंधनात् ६७ व्यासउवाच इत्युक्त्वांतर्दधेरामुस्तत्रैवमुक्तिदायकः कृतार्थो
ब्राह्मणःसोपिजगामनिजमंदिरं ६८ मद्दर्शनंत्वयाप्राप्तंदामोदरंततःविप्रपद्म
पुष्पैर्मनोहरैः यत्नादाराधयामासभक्त्यर्थंमुक्तिदंप्रभुं ६९ आराध्यदामोद

रमादिदेवंपद्मप्रसूनैर्विकचैस्सदिव्यैः॥ ज्ञानंसमंप्राप्यजगाममोक्षंमासादतःसगरुडध्वजस्य
७०॥ अनिछयापिकमलंयछतःफलमीदृशं॥ दामोदरायययोमन्यायछेत्किंज्ञायतेफ
लं॥ ७१॥ सत्यंसत्यपुनःसत्यंसत्यमेनत्पुनःपुनः॥ दामोदरंसमभ्यर्च्यपद्मैर्यातिपरं
पदं॥ ७२॥ दामोदराययोदद्यादेकमेवांजनंनरः॥ नस्यनास्तिपुनर्जन्मसंसारेस्मि
न्सुविस्तरे॥ ७३॥ दामोदरंफुल्लपयोजपुष्पैर्दयामयंकामदमर्चयंति॥ एकाहम
प्युत्कटपापग्रस्तास्तेयांतिमुक्तिंप्रतिपापिनोपि॥ ७४॥ इतिश्रीपद्मपुराणेक्रिया
योगसारेद्वादशोध्यायः १२॥ छ॥ छ॥ व्यासउवाच॥ मार्गशीर्षेद्विजश्रेष्ठम

हालक्ष्म्यासमन्वितं॥ संपूजयन्महाविष्णुंभक्तिभावेनवैष्णवः॥ १॥ उछिष्टदेहोविप्रेंद्रत
थैवपातकालये॥ दुर्गंधैश्चपरिव्याप्तेस्थानेविष्णुंनपूजयत्॥ २॥ पाखंडजनांसमीपे
चमहापातकिनांतथा॥ क्रंदतांसन्निधौचैवकलहानपिकुर्वतां॥ ३॥ तथाचोपह
तास्थानेनकुर्यात्पूजनंहरेः॥ ग्रामयाजिगृहेचैवत्यक्ताचारगृहेतथा॥ ४॥ चाचा
लानांसमीपेचनकुर्याद्विष्णुपूजनं॥ नारायणार्चनेविप्रनारायणपरायणः॥ ५॥
अन्यांचिंतांपरित्यज्यहरिध्यानपरोभवेत्॥ हाहाकारंचनिश्वसंविस्मयंचविव
र्जयेत्॥ ६॥ पाखंडजनसंभाषांनकुर्याद्विष्णुपूजने॥ अनन्यमनसोध्यात्वादेव

देवंजनार्द्दनं ७ भस्मन्यपिवयत्पुष्पंयच्छेत्तत्तुल्भेद्धरिः चितान्नतगतात्र्यानःशिला
चक्रेष्वपिद्विज ८ ददातिपुष्पंयन्मर्त्योनलभेत्तमपिप्रभुं अनन्यमनसोभूत्वाम
त्त्याविष्णुंयजेद्बुधः ९ भ्रांतचित्तेनयत्कर्मक्रियतेयच्चनिःफलं सर्वंकर्ममनो
धीनंधर्माधीनंजगत्त्रयं १० तस्मान्मनोहृदीकृत्यपूजयेत्कमलापतिं क्रियान्य
त्रमनोन्यत्रभवेद्यस्यद्विजोत्तम ११ नचतस्यफलंतत्कार्यंकल्पकोटिशतैरपि य
त्नाद्विहिनत्रोवोपिविष्णुपूजापरोभवेत् १२ नमःशुद्धविहीनाश्चचांडालश्वग
ण्यते अभक्त्यायस्तपस्तप्तंचिरंचविधिनाद्विज १३ भवेनिरर्थकंसर्वंकेवलं

१४३

कायशोदनं मेरुप्रमाणंकनकंब्राह्मणायकुटुंबिने १४ दत्तमप्यर्थनाशायश्चभक्त्या
श्रमंभवच्च तस्मादेकमनोभूत्वाभक्तिःश्रद्धासमन्वितः १५ पूजयेत्कमलाकांतं
चतुर्वर्गफलाप्तये नागरंगंफलंदिव्यंसुपक्वंयस्तुयच्छति १६ केशवायद्विजश्रे
ष्ठसोस्माभिःपूज्यतेद्विज यदन्यंनूतनंवस्तुप्रियंभगवतोहरेः १७ तद्देवाग्रह
णोमासिभक्त्यादद्यान्मुरारये पौषमासिसमायातिश्रीकृष्णंभवनेश्वरं १८
नित्यमिक्षुरसैर्दिव्यैस्नापयेद्दृष्टमवाजन यपिक्षुसलिलैर्विष्णुस्नापयेद्भवनेश्व
रं पौषेसचसुरवंभुक्त्वामृतोयातीक्षुसागरे भुवनेशायपयोदद्यादिक्षुनैवाद्य

मुत्तमं २० भुवनेशपुरंयातिसोपिविमनसंशयः सद्गुग्धंपृथुकंपौषेदधिभिर्वासमन्वि
तं २१ भवनेशाययोदद्यात्सर्वकाममवाप्नुयात् सर्वपुरातनंवस्त्रंदुरीकृत्यनवोत्थ
यं २२ नूतनंभुवनेशायदद्यात्सीतनिवारणं विष्णवेभुवनेशायययौसंक्रमणेद्वि
ज २३ दद्यान्मुमुक्षुर्मनुजोदशावर्णंचापिष्टकं शंखध्वनिंप्रकुर्वीत्रसंपूज्यभुव
नेश्वरं २४ तस्यपुण्यफलंविप्रवदतोमेनिशामय आगम्यागमनाश्चैवस्त्र वि
मुक्तःसर्वपातकैः २५ भुवनेश्वरपुरंगत्वातेनैवसहमोदते वैनतेयांकितांघंटां

भुवनेशायतस्त्रयः २६ भतस्यावादयतेतस्ययत्फलंतद्वदाम्यहं अभक्ष्यभ

क्षणाद्येश्चमुक्तःपापैःसुदारुणैः २७ भुवनेशपुरंयातिरथमारुह्यशोभनं तत्रमुक्ता
खिलान्भोगान्कल्पकोटिशतावधि २८ पुनरागत्यधरणींचतुर्वेदीद्विजोभवेत्
तत्रापिचसुखंभुक्त्वाशोकदुःखविवर्जितः २९ भुवनेशपुरंगत्वापुनर्नोक्षम
वाप्नुयात् भुवनेश्वरपूजायांवीणांवादयतेतुयः ३० पंडितानामग्रणीस्या
त्समर्त्यःप्रतिजन्मनि भुवनेश्वरपूजायांमृदंगवाद्यकृन्नरः ३१ यस्तस्यदेव
देवेशोददात्यभिमतंफलं डमरूडिंडिमश्चैवझर्झरांमधुरींतथा ३२ परहंदुमि
श्चैवकालहंसिंधुवारणं कांस्यंचकारतालंचवेणुंवादयतेतुयः ३३ भुवनेश्वर

पूजायांमृदंगवाद्यकृन्नरः यस्तस्यदेवदेवेशमेतस्यपुण्यनिशामयं स्तैयाद्यैःपात
कैर्मुक्तोभुवनेशपरंव्रजेत् ३४ ज्ञानंतत्रैवसंप्राप्यमुक्तिमाप्नोत्यनुत्तमां भुवने
श्वरस्यपूजायांकलशाढ्ककरोतियः ३५ मुखवाद्यंत्वविप्रर्षेतस्यपुण्यंमयोच्यते भु
वनेशपुरंयातिसकोटिकुलसंयुतः ३६ ज्ञानंतत्रैवचासाद्यसचमोक्षमवाप्नु
यात् भुवनेशगृहेयस्तुभक्तियुक्तःप्रनृत्यति ३७ भुवनेशपुरंयातिसदेवैरपिदु
र्लभं भुवनेशाग्रतोयस्तुगीतंभक्त्याप्रगीयते ३८ सनृपत्वमवाप्नोतिगंधर्वा
णांपुरेध्रुवं यैःस्तौतिभक्तिनःस्तोत्रैःश्रीकृष्णंभवनेश्वरं ३९ तस्मैप्रसन्नोभ

१४६

पश्येद्यस्तुदेवस्यमहास्नानंजगत्पतेः ४९ तस्यासिध्यतिविप्रर्षेसर्वएव
मनोरथः ब्रह्माद्यास्त्रिदशाःसर्वेस्थित्वाऽकाशेजगत्पतेः ५० महास्ना
नंप्रपश्यंतिभक्तिभावसमन्विताः महाज्येष्ठ्यांत्वविप्रर्षेमुक्तिदंतंजगत्प
तिं ५१ आलोक्यलभतेमर्त्योविष्णोस्तत्परमंपदं गुंडीचामंडपेजातेआ
षाढेकमलापतिं ५२ बलभद्रंचयःपश्येत्समुक्तोनात्रसंशयः येपश्यंति
जगन्नाथंरथस्थंकमलेक्षणं ५३ तेषांनास्तिपुनर्जन्मसंसारेस्मिन्सुदु
स्तरे रथारूढंसुभद्रांचपश्येद्यपरमादरैः ५४ छिनत्तिभगवांस्तस्यजयामि

